श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्य विरचिता

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवतोटकस्तुतिः ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवतोटकस्तुतिः ॥

मधुकैटभमर्दनदक्ष ! विभो ! हयवक्त्र ! रमादयितेति जपन्।
सकलं किल कालमहं भविता विपदः कथमत्र भवेयुरहो॥ १ ॥

रमणीसुपुरे कृतवासमहं तुरगं वदने सततं कलये।
यमपत्तनवासकथा न हि मे विपदामपदं भविताऽस्मि दृढम्॥ २ ॥

रमणीसुपुराधिपवाजिमुखे कमलासहिते मम भारमहम्।
सकलं विनिवेश्य मुदामभवं ननु वासमहीतलमत्र सदा॥ ३ ॥

जगतां परिपालनसद्व्रतवान् वदने तुरगो वरदो भगवान्।
तमहं सततं मनसा वचसा प्रणतो भयमत्र न मे भविता॥ ४ ॥

भगवन् ! मधुकैटभगर्वहरागमदोऽसि विधेरयि ! पालय माम्।
इति ते सविधे कथयन् सततं करुणां तव सत्यमशीय विभो !॥ ५ ॥

ध्रुवबालकपोलकृताब्ज हरे ! कवने पटुतां त्वमदा झटिति।
मयि चाऽपि तथा करुणां कुरु हे रमणीसुपुरे वदने तुरग !॥ ६ ॥

अहिराजपुरे तपसा मुदितः कवितार्किककेसरितां प्रददौ।
स भवान् भगवन् ! तव साम्यमयं रमणीसुपुरे भजते गुरुराट्॥ ७ ॥

स्पृहये नहि तादृशमत्र पदं त्वपि तस्य गिरामथ भावधियम्।
वितरेर्मम येन भवत्पदयोः भगवन् ! भजनं सुलभं भवितृ॥ ८ ॥

यतिराडभवत्तव भक्तवरो मतिदोऽस्य कथाहवसङ्गजये।
त्वमभूस्स च शारदयाऽभिनुतो वितरेर्मम भावमथास्य गिराम्॥ ९ ॥

गुणिनां गणने बहुदूरगतः प्रथमस्तव दुस्सहपापकृताम्।
अपि मय्यथ ते करुणा प्रवहेदिति मे वदनेऽश्व ! मतिस्सुदृढा॥ १० ॥

करुणाकरसत्कविसूनुकृतं त्वपि नीरसमस्ति मुदे कवनं।
करुणाकर ! तुङ्ग ! तुरङ्ग ! मुखे करुणां कुरु तन्मयि पापिनि हे !॥ ११ ॥

॥ इति श्रीनङ्गैनल्लूर् हयग्रीवतोटकस्तुतिः संपूर्णा ॥